# काव्य रचना

---

### बालगंधर्वाभिवंदना

नमोऽस्तु नारायण राजहंस
भूबालगंधर्व नटाग्रयायिन् ।
येन त्वया भारतरंगभूमिः
समुन्नतिं स्वाभिनयेन नीता ॥ १ ॥
निपुणताऽभिनये रुचिरा तनुः
सरसशुद्धपदा ललिता गिरा।
अभिनवाभिनयानुगगानता
विजयते नटराज जयोऽस्तु ते ॥ २ ॥
नाट्यवेदसमुद्धर्त्रे
गांधर्वीं दर्शिने कलाम् ।
भारतीनाट्यवृध्यर्थं
स्मृतिः श्रेयःप्रदाऽस्तु ते ॥ ३ ॥

***

### श्रीगुरुःशरणम्
### दोलान्दोलनगीतम्

अयि मेधाविन् तात वत्स चिरजीविन्
दोलायां रमतां मोदिन् ।

ऋक्विकासमोदोद्यानम्
देवकुलोत्तंसवरिष्ठम्
गुरुरायकृपामृतकुंभम् ।
रे पोत त्वां गायति दोला ललितम्
स्पपिहि सौम्य शान्तमनस्कम् ॥ १ ॥

रे पुत्र स्यात् सकलं ते मधुमधुरम्
पौरुषं तथाप्यभिरामम् ।
पुष्यतु ते गात्रद्रढिमा
वृद्धिमेतु ते गुणगरिमा
प्रथयतु ते भुवि कुलमहिमा ।
भव पित्र्यर्थे नित्यं सुखसर्वस्वम्

स्पपिहि सौम्य शान्तमनस्कम्     ॥ २ ॥

शिवसंस्कारैः संवर्धय चारित्र्यम्
भवतु तत् परेषां स्पृह्यम्   ।
भूषणं भवतु सच्छीलम्
औदार्यं चरमं विभवम्
सौहार्दं स्यात् ते सुकृतम्        ।
गुरुकृपया ते भवतु जात कल्याणम्
स्पपिहि सौम्य शान्तमनस्कम्     ॥ ३ ॥

श्रेयो भूयात् शिवं भूयात् भद्रं भद्रात्मनां सदा
प्रियं चापि तथा भूयात् परेश प्रार्थये ऽ निशम्   ॥

***

**श्रीगुरुःशरणम्**

**सतिसावित्रीकृतं यमराजाभिवंदनम्**

नमोऽस्तु वैवस्वत धर्ममूर्ते ।
संहारकर्त्रे यमराज तुभ्यम् ।
पापं च पुण्यं प्रसमीक्ष्य काले।
करोति यः संयमनं प्रजानाम् ॥
त्वं दक्षिणस्यां दिशि देव दिव्यम् ।
उच्चैः सदा धिष्ण्यमलंकरोषि ।
त्वद्दर्शनात् स्वस्ति ममास्तु नित्यम् ।
स्वामिन् पितृणां भगवन् नमस्ते ॥

***

**प्रसन्न-श्री-हिर्लेकर-व्रतबंधनिमित्तकम्**

**श्लोक-मंगल-पंचकम्**

॥**श्रीकनकादित्यो विजयतेतराम्**॥

श्रीमन्महागणाधिपतये नमः। श्रीसरस्वत्यै नमः । श्री कुलदेवतायै नमः

वन्दे विघ्नविनायकं गजमुखं निर्विघ्नकामाप्तये
वन्द्यश्रीकुलदैवताय कनकादित्याय नित्यं नमः
सश्रद्धं च समर्प्यतेऽध्वरवरश्रीविष्णवे वन्दनम्
श्रीरंगात्मज वंदनासुत बटो भूयात् प्रसन्नार्य शम् ॥१ ॥

कौपिनं कटिमेखला करधृतो दंडः शिखा मस्तके
काये भस्म मृगाजिनं प्रयतता मंत्रो मुखे वीर्यवान्
सर्वं स्यात् परमं पुमर्थकरणं यज्ञोपवितं तथा
श्रीरंगात्मज वंदनासुत बटो भूयात् प्रसन्नार्य शम् ॥२॥

कल्याणं व्रतबंधनं भवतु तत् विद्याबलावाप्तये
संपन्नित्यमुदेतु मोक्षफलदा दैवी व्रतोद्यापने
वेदाधीतिरुचिः श्रियै श्रयतु ते पुण्या च वाक् सूनृता
श्रीरंगात्मज वंदनासुत बटो भूयात् प्रसन्नार्य शम् ॥३॥

सा विद्या नितरां हिताय सततं या श्रद्धया सेव्यते
बोधोऽयं व्रतबंधजो निवसतु श्रेयान् शिशोर्मानसे
सन्नध्दो व्रतपालने भव मुदा धीधैर्यभाक् सर्वदा
श्रीरंगात्मज वंदनासुत बटो भूयात् प्रसन्नार्य शम् ॥४॥

आरोग्यं सविता प्रयच्छतु गिरं श्रीशारदा सूनृताम्
संकल्पे शिवतां शिवो वितरतु प्रज्ञां सुराणां गुरुः
विद्यां श्रीगणनायको रघुपतिःस्वाचारधर्मे स्पृहाम्
श्रीरंगात्मज वंदनासुत बटो भूयात् प्रसन्नार्य शम् ॥५॥

बट्वाचार्ययोः शुभं भवतु ।

॥ ॐ शांति : शांतिः शांतिः ॥

वसंत पंचमी शः १९२४

**रचयिता- वैद्य श्री. पु.हिर्लेकर**